# पाठ-१६
# मानो हि महतां धनम्

**सारान्शः**
प्राचीनकाले एका 'पुरिका' नाम नगरी आसीत्।तस्यां नगर्यां अतीव क्रूरः निर्दयः पौरिकः नाम राजा आसीत्।सः राजा पूर्वकर्मप्रभावेन अन्यस्मिन् जन्मनि शृगालः अभवत् ।सः शृगालः पूर्वजन्म स्मृत्वा वैराग्यं प्राप्तवान्।वीरः व्याघ्रः शृगालं पवित्रं विद्वांसं मत्वा तस्य नृपतुल्यपूजादिकं कृत्वा = सम्मानादिकं कृत्वा तं सचिवपदाय अवरयत्।व्याघ्रस्य सेवकाः शृगालं शुभकर्मयुक्तं वारम्वारं वन्द्यमानं दृष्ट्वा द्वेषम् अकुर्वन् ।ते कर्मचारिणः भ्रष्टाः आसन् । इदानीं शृगालस्य अनुशासने ते चौर्यकर्म कर्तुमशक्ताः एकम् उपायं चिन्तितवन्तः। व्याघ्रस्य कृते सिद्धं मांसं हृत्वा शृगालस्य निवासस्थाने अस्थापयन्। ते व्याघ्रं सूचितवन्तः यत् तन्मांसं शृगालेन हृतम्। तत् ज्ञात्वा व्याघ्रः आदिशत् शृगालः हन्यताम् इति। एतत् ज्ञात्वा व्याघ्रस्य माता अवदत् पुत्र! त्वया सुष्ठु न कृतम् । एतत् कपटपूर्णम् आचरणं प्रतीयते।
तदा एकः धर्मात्मा कर्मचारी शत्रुदलात् आगत्य व्याघ्राय वस्तुस्थितिं निवेदितवान्। सत्यं ज्ञात्वा व्याघ्रः शृगालस्य सम्मानम् अकरोत् परन्तु शृगालः अवदत् या मैत्री क्षणे क्षणे भिन्ना श्लिष्टा वा भवति सा मैत्री स्थायिनी नास्ति । अतः राजानं धर्मपूर्वकानि वचनानि कथयित्वा शृगालः सचिवपदं त्यक्त्वा वनमगच्छत् । नूनं महापुरुषाणां कृते सम्मानः एव धनं भवति।

**मुख्य बिन्दवः**
महाभारतं पञ्चमः वेदः मन्यते अस्य रचयिता अस्ति महर्षिकृष्णद्वैपायनव्यासमहाभागः । अस्मिन् ग्रन्थे एतादृशः कोऽपि विषयः न अस्ति यः अत्र न वर्णितः । स्वयमेव कथयति महर्षिः व्यासः-
**धर्मे अर्थे च कामे च मोक्षे च भरतर्षभ।**
**यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत् क्वचित्।।**
अतएव् महत्त्वात् भारवत्त्वाच्च महाभारतम् उच्यते अस्मिन् ग्रन्थे शतसहस्रसंख्याकाः श्लोकाः सन्ति । अत्र अष्टादश पर्वाणि सन्ति प्रस्तुतः पाठः महाभारतस्य शान्तिपर्वणः एकादशाधिकशततमात् अध्यायात् सङ्कलितः ।

**अवगच्छामः**
महाभारत ग्रन्थे न केवलं कौरव-पाण्डवानाम् एव युद्धं वर्णितम् अपितु असंख्याः कथाः तत्र दत्ताः, याभ्यः अमूल्याः शिक्षाः प्राप्यन्ते। लोभः समस्तानां व्याधीनां मूलम् । तदर्थम् एव उक्तं- अति लोभो न कर्तव्यः।

**आवश्यकोऽयं ज्ञानम्**
अस्य महाभारतस्य भीष्मपर्वणि श्रीमद्भगवद्गीता विद्यते। भगवता कृष्णेन मोहग्रस्तम् अर्जुनं प्रति ज्ञान-कर्म-भक्ति-विषयकः उपदेशः गीतायां प्रदत्तः। अस्यां गीतायामपि अष्टादश अध्यायाः सन्ति । मानव-जीवनस्य विविधविषयाः अत्र समीचीनतया प्रतिपादिताः सन्ति । इयं विश्वजनीन-कृतिः कालजयिनी चिरन्तनी एव । प्रथमं महाभारतम् इतिहासः पुराणम् आख्यानकञ्चेति नामभिः आख्यायते स्म साम्प्रतिकास्तु महाभारतम् आचारशास्त्रम् नीतिशास्त्रम् धर्मार्थकाममोक्षाख्यचतुर्वर्गसाधनम् चामनन्ति । भारतं पञ्चमो वेदः इति सर्वत्र प्रचारितम् । सर्वत्रास्मिन् ग्रन्थे वैष्णवसिद्धान्तानां प्रमुखत्वेन प्रतिपादनात् महाभारत वैष्णवस्मृतिरप्याख्यायते महाभारतस्य
अशीतिप्रतिशतभागोऽनेकविधोपदेशमयः, विंशतिप्रतिशतभाग एवेतिहासप्रतिपादक इति अस्य नीतिशास्त्रेषु गणनोचिता|

**व्याकरण बिन्दवः शब्द भण्डाराश्च**
द्वन्द्वसमासे द्वयोः अनेकेषां च पदानां समाहारेण योजनं भवति **।उक्तं च- "चकार बहुलो द्वन्द्वः"**

अन्यपद प्रधानो बहुव्रीहि **(यस्य येन बहुव्रीहि)**

**शब्दार्थाः**
1. परैः = दूसरों के द्वारा
2. यथाकालम् = समयानुसार
3. कृतसंघाताः = मिले हुए
4. वेश्म = घर में
5. क्षिप्रम् = शीघ्र
6. विमोक्षितः = छोड़ दिया गया
7. दृश्यते = दिखाई देता है
8. सान्त्वं = सान्त्वनायुक्त

**योग्यतां वर्धयत**
**(i)** आमिषं चैव नो हीष्टमामिषस्य विवर्जनम् (महाभारतम् शा.प. 7.10)
**(ii)** त्यागवांश्च पुनः पापं नालं कर्तुम् इति श्रुतिः (महा. अनु. पं. 7.38)
**(iii)** कर्मैव हि कर्तव्यं नास्ति सिद्धिरकर्मणः। (महा. अ. प. 10.26)
**(iv)** उद्यमो मित्रवद् ग्राह्यः प्रमादं शत्रुवत् त्यजेत्। (बुद्धचरितम् 26.73)

**(v)** हिंसा भार्या त्वधर्मस्य । (अग्नि. पु. 20.18)

**पाठ संप्रेष्यः**

- महाभारतम् ज्ञानस्य कोषः ।
- जनाः स्वार्थवशीभूताः कपटं कुर्वन्ति परन्तु अस्माभिः तेषां वशे न भवितव्यम्।
- भावशुद्धाः जनाः सुदुर्लभाः भवन्ति।
- कर्मवाच्ये वाक्यानि यदा कर्तृवाच्ये परिवर्त्यन्ते तदा कर्म प्रथमान्तम्, कर्ता तृतीयान्तं, कर्त्रा सह क्रियायाः सम्बन्धः भवति ।
- स्वरसन्धिः पूर्वपदस्य अन्तिमेन स्वरेण परपदस्य प्रथमस्वरवर्णेन मिलित्वा संभवति।
- द्वन्द्वसमासे द्वयोः अनेकेषां च पदानां समाहारेण योजनं भवति ।
- बहव्रीहिसमासे अन्यपदं प्रधानं भवति
- 'सर्व' सर्वनाम शब्दस्य रूपाणि त्रिषु लिङ्गेषु भवन्ति।

**अधिकाङ्क्षानाम् अर्जनं कथं भवेत् ।**

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत ।
- मूल पाठस्य अभ्यासं कुरुत।